ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः, ह॒रि॒ः ओं ॥

# तैत्तिरीयसंहितायां प्रत्येकप्रश्नस्य प्रथमान्त्यं पञ्चाशतिः

# Version Notes:

**This is now the current Version 0.0 dated June 30, 2025.**

1. This version consists of only “beginning panchati” and “end panchati” for all 44 Prasnams, ie total only 88 panchatees . Each “beginning panchati” is marked as **“first”** and each “end panchati” as “**last**” with respective Panchati numbers.

2. Please note that all Panchaatees begin and end here with the padam as per “pada paadam”,  not as per samhita chant. Few Examples are:

| ref | as per samhita | shown here |
|---|---|---|
| TS 1.2.1.1 | वर्चो॒ | वर्चः॑ |
| TS 1.4.1.1 | यु॒ष्माक॒ꣳ॒ | यु॒ष्माकं᳚ |
| TS 2.4.14.5 | श्च ॥ | च॒ ॥ |

3. Required convention, style and presentation improvements or standardisations has been done whereever applicable.

4. Notify your corrections / suggestions etc to our email id vedavms@gmail.com.

## Earlier Versions

None

# Contents

TS 1.1.1.1 - First.......6
TS 1.1.14.4 - Last.......6
TS 1.2.1.1 - First.......7
TS 1.2.14.7 - Last.......7
TS 1.3.1.1 - First.......8
TS 1.3.14.8 - Last.......8
TS 1.4.1.1 - First.......9
TS 1.4.46.3 - Last.......9
TS 1.5.1.1 - First.......10
TS 1.5.11.5 - Last.......10
TS 1.6.1.1 - First.......11
TS 1.6.12.6 - Last.......11
TS 1.7.1.1 - First.......12
TS 1.7.13.5 - Last.......12
TS 1.8.1.1 - First.......13
TS 1.8.22.5 - Last.......13
TS 2.1.1.1 - First.......14
TS 2.1.11.6 - Last.......14
TS 2.2.1.1 - First.......15
TS 2.2.12.8 - Last.......15
TS 2.3.1.1 - First.......16
TS 2.3.14.6 - Last.......16
TS 2.4.1.1 - First.......17
TS 2.4.14.5 - Last.......17
TS 2.5.1.1 - First.......18
TS 2.5.12.5 - Last.......18
TS 2.6.1.1 - First.......19
TS 2.6.12.6 - Last.......19
TS 3.1.1.1 - First.......20
TS 3.1.11.8 - Last.......20
TS 3.2.1.1 - First.......21
TS 3.2.11.3 - Last.......21

TS 3.3.1.1 - First........................................................................................................22
TS 3.3.11.5 - Last........................................................................................................22
TS 3.4.1.1 - First........................................................................................................23
TS 3.4.11.6 - Last........................................................................................................23
TS 3.5.1.1 - First........................................................................................................24
TS 3.5.11.5 - Last........................................................................................................24
TS 4.1.1.1 - First........................................................................................................25
TS 4.1.11.4 - Last........................................................................................................25
TS 4.2.1.1 - First........................................................................................................26
TS 4.2.11.3 - Last........................................................................................................26
TS 4.3.1.1 - First........................................................................................................27
TS 4.3.13.8 - Last........................................................................................................27
TS 4.4.1.1 - First........................................................................................................28
TS 4.4.12.5 - Last........................................................................................................28
TS 4.5.1.1 - First........................................................................................................29
TS 4.5.11.2 - Last........................................................................................................29
TS 4.6.1.1 - First........................................................................................................30
TS 4.6.9.4 - Last........................................................................................................30
TS 4.7.1.1 - First........................................................................................................31
TS 4.7.15.7 - Last........................................................................................................31
TS 5.1.1.1 - First........................................................................................................32
TS 5.1.11.4 - Last........................................................................................................32
TS 5.2.1.1 - First........................................................................................................33
TS 5.2.12.2 - Last........................................................................................................33
TS 5.3.1.1 - First........................................................................................................34
TS 5.3.12.2 - Last........................................................................................................34
TS 5.4.1.1 - First........................................................................................................35
TS 5.4.12.3 - Last........................................................................................................35
TS 5.5.1.1 - First........................................................................................................36
TS 5.5.24.1 - Last........................................................................................................36
TS 5.6.1.1 - First........................................................................................................36
TS 5.6.23.1- Last........................................................................................................37
TS 5.7.1.1 - First........................................................................................................37

TS 5.7.26.1 - Last .......... 37
TS 6.1.1.1 - First .......... 38
TS 6.1.11.6 - Last .......... 38
TS 6.2.1.1 - First .......... 39
TS 6.2.11.4 - Last .......... 39
TS 6.3.1.1 - First .......... 40
TS 6.3.11.6 - Last .......... 40
TS 6.4.1.1 - First .......... 41
TS 6.4.11.4 - Last .......... 41
TS 6.5.1.1 - First .......... 42
TS 6.5.11.4 - Last .......... 42
TS 6.6.1.1 - First .......... 43
TS 6.6.11.6 - Last .......... 43
TS 7.1.1.1 - First .......... 44
TS 7.1.20.1 - Last .......... 44
TS 7.2.1.1 - First .......... 45
TS 7.2.20.1 - Last .......... 45
TS 7.3.1.1 - First .......... 46
TS 7.3.20.1 - Last .......... 46
TS 7.4.1.1 - First .......... 47
TS 7.4.22.1 - Last .......... 47
TS 7.5.1.1 - First .......... 48
TS 7.5.25.2 - Last .......... 48
T.A.7.42.6 .......... 49

==========

**ओं नमः परमात्मने, श्री महागणपतये नमः, श्री गुरुभ्यो नमः**

**हरिःओं**

**TS 1.1.1.1 - First**

इषे त्वोर्जे त्वा, वायवः स्थोपायवः स्थ देवो वः सविता प्रार्पयतु
श्रेष्ठतमाय कर्मण आ प्यायद्ध्वमघ्निया देवभाग-मूर्जस्वतीः पयस्वतीः
प्रजावती-रनमीवा अयक्ष्मा मा वः स्तेन ईशत मा ऽघशꣳसो रुद्रस्य
हेतिः परि वो वृणक्तु, ध्रुवा अस्मिन् गोपतौ स्यात बह्वीर्, यजमानस्य
पशून् पाहि ॥ 1

**TS 1.1.14.4 - Last**

सेदु होता सो अद्ध्वरान्थ् स ऋतून् कल्पयाति ॥
यद्-वाहिष्ठं तदग्नये बृहदर्च विभावसो ।
महिषीव त्वद्-रयि-स्त्वद्-वाजा उदीरते ॥
अग्ने त्वं पारया नव्यो अस्मान्थ् स्वस्तिभिरति दुर्गाणि विश्वा ।
पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शं ँयोः ॥
त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा । त्वं ँयज्ञेष्वीड्यः ॥
यद्-वो वयं प्रमिनाम व्रतानि विदुषां देवा अविदुष्टरासः ।
अग्निष्टद् विश्वमा पृणाति विद्वान्. येभिर् देवाꣳ ऋतुभिः कल्पयाति ॥ 28

**TS 1.2.1.1 - First**

आप उन्दन्तु जीवसे दीर्घायुत्वाय वर्चस ओषधे त्रायस्वैनꣳ स्वधिते मैनꣳ हिꣳसीर् देवश्रूरेतानि प्र वपे स्वस्त्युत्तराण्यशीयाऽऽपो अस्मान् मातरः शुन्धन्तु घृतेन नो घृतपुवः पुनन्तु विश्वमस्मत् प्र वहन्तु रिप्रमुदाभ्यः शुचिरा पूत एमि सोमस्य तनूरसि तनुवं मे पाहि महीनां पयो ऽसि वर्चोधा असि वर्चः । 1

**TS 1.2.14.7 - Last**

स रिषः पातुनक्तं ॥

वि ज्योतिषा बृहता भात्यग्निराविर्विश्वानि कृणुतेमहित्वा ।
प्रादेवीर्मायाः सहते दुरेवाः शिशीते शृङ्गे रक्षसे विनिक्षे ॥
उत स्वानासो दिवि षन्त्वग्ने स्तिग्मायुधा रक्षसे हन्तवा उ ।
मदे चिदस्य प्र रुजन्ति भामा न वरन्ते परिबाधो अदेवीः ॥ 34

**TS 1.3.1.1 - First**

देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामा

ददे ऽभ्रिरसि नारिरसि परिलिखित॒ꣳ रक्षः परिलिखिता अरातय

इदमह॒ꣳ रक्षसो ग्रीवा अपि कृन्तामि यो ऽस्मान् द्वेष्टि यं च वयं

द्विष्म इदमस्य ग्रीवा अपि कृन्तामि दिवे त्वा ऽन्तरिक्षाय त्वा पृथिव्यै

त्वा शुन्धतां ँल्लोकः पितृषदनो यवो ऽसि यवयास्मद्द्वेषः । 1

**TS 1.3.14.8 - Last**

पवस आ सुवोर्जमिषं च नः ।

आरे बाधस्व दुच्छुनां ॥

अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यं ।

दधत्पोष॒ꣳ रयिं मयि ॥

अग्ने पावक रोचिषा मन्द्रया देव जिह्वया ।

आ देवान्. वक्षि यक्षि च ॥

स नः पावक दीदिवो ऽग्ने देवा॒ꣳ इहा वह ।

उप यज्ञ॒ꣳ हविश्च नः ॥

अग्निः शुचिव्रततमः शुचिर्विप्रः शुचिः कविः ।

शुची रोचत आहुतः ॥ उदग्ने शुचयस्तव शुक्रा भ्राजन्त ईरते ।

तव ज्योती॑ष्यर्चयः ॥ 31

**TS 1.4.1.1 - First**

आ द॑दे ग्रावा᳚स्यद्ध्वर॒कृद् दे॒वेभ्यो॑-गंभी॒रमि॒म-म॑द्ध्व॒रं कृ॑द्ध्युत्त॒मेन॑ प॒विनेन्द्रा॑य॒ सोम॒ꣳ॒ सुषु॑तं॒ मधु॑मन्तं॒ पय॑स्वन्तं ँ॒वृष्टि॒वनि॒मिन्द्रा॑य त्वा वृत्र॒घ्न इन्द्रा॑य त्वा वृत्र॒तुर॒ इन्द्रा॑य त्वा ऽभिमाति॒घ्न इन्द्रा॑य त्वा ऽऽदित्य॒वत॒ इन्द्रा॑य त्वा वि॒श्वदे᳚व्यावते श्वा॒त्राः स्थ॑ वृत्र॒तुरो॒ राधो॑गूर्ता अ॒मृत॑स्य॒ पत्नी॒स्ता दे॑वीर्देव॒त्रेमं ँ॒यज्ञं ध॒त्तोप॑हूता॒ः सोम॑स्य पि॒बतोप॑हूतो यु॒ष्माकं᳚ । 1

**TS 1.4.46.3 - Last**

अ॒द्ध्वरे॑षु राजन्न् ।

त्वया॒ वाजं॑ ँ॒वाजय॑न्तो जये॒माभि॑ ष्याम पृथ्सु॒तीर् मर्त्या॑नां ।

त्वाम॑ग्ने वाज॒सात॑मं॒ ँविप्रा॑ वर्द्धन्ति॒ सुष्टु॑तं ।

स नो॑ रास्व सु॒वीर्यं᳚ ॥

अ॒यं नो॑ अ॒ग्निर्वरि॑वः कृणोत्व॒यं मृधः॑ पु॒र ए॑तु प्रभि॒न्दन्न् ।

अ॒यꣳ॒ शत्रू᳚ञ्जयतु॒ जर्.हृ॑षाणो॒ ऽयं ँवाजं॑ जयतु॒ वाज॑सातौ ॥

अ॒ग्निना॒ ऽग्निः समि॑द्ध्यते क॒विर् गृ॒हप॑ति॒र् युवा᳚ ।

ह॒व्य॒वाड् जु॒ह्वा᳚स्यः ॥ त्वꣳ ह्य॑ग्ने अ॒ग्निना॒ विप्रो॒ विप्रे॑ण॒ सन्थ्स॒ता ।

सखा॒ सख्या॑ स॒मिद्ध्यसे᳚ ॥ उद॑ग्ने॒ शुच॑य॒स्तव॒ वि ज्योति॑षा ॥ 54

**TS 1.5.1.1 - First**

देवासुराः सँयत्ता आसन् ते देवा विजयमुपयन्तो ऽग्नौ वामं ँवसु

सं न्यदधतेदमु नो भविष्यति यदि नो जेष्यन्तीति तदग्निर्न्यकामयत

तेनापाक्रामत् तद्-देवा विजित्यावरुरुत्समाना अन्वायन् तदस्य

सहसाऽऽ *दित्सन्त सो ऽरोदीद्-यदरोदीत् तद् रुद्रस्य रुद्रत्वं

ँयदश्रुवशीयत तत् । 1

**TS 1.5.11.5 - Last**

उप गन्तन ॥

या वः शर्म शशमानाय सन्ति त्रिधातूनि दाशुषे यच्छताधि ।

अस्मभ्यं तानि मरुतो वि यन्त रयिं नो धत्त वृषणः सुवीरं ॥

अदितिर्न उरुष्यत्वदितिः शर्म यच्छतु । अदितिः पात्वꣳहसः ॥

महीमू षु मातरꣳ सुव्रतानामृतस्य पत्नीमवसे हुवेम ।

तुविक्षत्रा-मजरन्ती-मुरूचीꣳ सुशर्माणमदितिꣳ सुप्रणीतिं ॥

सुत्रामाणं पृथिवीं द्यामनेहसꣳ सुशर्माण मदितिꣳ सुप्रणीतिं ।

दैवीं नावꣴ स्वरित्रा-मनागस-मस्रवन्तीमा रुहेमा स्वस्तये ॥

इमाꣳ सु नावमा ऽरुहꣳ शतारित्राꣳ शतस्फ्यां ।

अच्छिद्रां पारयिष्णुं ॥ 51

**TS 1.6.1.1 - First**

सं त्वा सिञ्चामि यजुषा प्रजामायुर्द्धनं च ।

बृहस्पतिप्रसूतो यजमान इह मा रिषत् ॥

आज्यमसि सत्यमसि सत्यस्याद्ध्यक्षमसि हविरसि वैश्वानरं

वैँश्वदेव-मुत्पूतशुष्मꣳ सत्यौजाः सहो ऽसि

सहमानमसि सहस्वारातीः सहस्वारातीयतः सहस्व पृतनाः

सहस्व पृतन्यतः ।

सहस्रवीर्यमसि तन्मा जिन्वाज्यस्याज्यमसि सत्यस्य

सत्यमसि सत्यायुः । 1

**TS 1.6.12.6 - Last**

सहसावन् परिष्टावघाय भूम हरिवः परादै ।

त्रायस्व नो ऽवृकेभिर् वरूथैस्तव प्रियासः सूरिषु स्याम ॥

अनवस्ते रथमश्वाय तक्षन्-त्वष्टा वज्रं पुरुहूत द्युमन्तं ।

ब्रह्माण इन्द्रं महयन्तो अर्कैरवर्द्धयन्नहये हन्तवा उ ॥

वृष्णे यत् ते वृषणो अर्कमर्चानिन्द्र ग्रावाणो अदितिः सजोषाः ।

अनश्वासो ये पवयो ऽरथा इन्द्रेषिता अभ्यवर्त्तन्त दस्यून् ॥ 51

**TS 1.7.1.1 - First**

पाकयज्ञं ँवा अन्वाहिताग्नेः पशव उप तिष्ठन्त इडा खलु वै

पाकयज्ञः सैषा ऽन्तरा प्रयाजानूयाजान्. यजमानस्य लोके ऽवहिता

तामाह्रियमाणामभि मन्त्रयेत सुरूपवर्.षवर्ण एहीति पशवो वा इडा

पशूनेवोप ह्वयते यज्ञं ँवै देवा अदुह्रन्. यज्ञो ऽसुरा॑ अदुहत्

ते ऽसुरा यज्ञदुग्धाः परा ऽभवन्. यो वै यज्ञस्य दोहं ँविद्वान् । **1**

**TS 1.7.13.5 - Last**

पतयः स्याम ॥

तस्य वय॑ सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम ।

स सुत्रामा स्ववा॑ इन्द्रो अस्मे आराच्चिद्द्वेषः सनुतर्युयोतु ॥

रेवतीर्नः सधमाद इन्द्रे सन्तु तुविवाजाः ।

क्षुमन्तो याभिर्मदेम ॥

प्रो ष्वस्मै पुरोरथमिन्द्राय शूषमर्चत ।

अभीके चिदु लोककृथ् सङ्गे समथ्सु वृत्रहा ।

अस्माकं बोधि चोदिता नभन्ता-मन्यकेषां ।

ज्याका अधि धन्वसु ॥ **51**

**TS 1.8.1.1 - First**

अनुमत्यै पुरोडाश-मष्टाकपालं निर्वपति धेनुर्दक्षिणाये प्रत्यञ्चः

शम्याया अवशीयन्ते तं नैर्.ऋत-मेककपालं कृष्णं ँवासः कृष्णतूषं

दक्षिणा वीहि स्वाहा ऽऽहुतिं जुषाण एष ते निर्.ऋते भागो भूते

हविष्मत्यसि मुञ्चेम-मꣳहसः स्वाहा नमो य इदं चकारा ऽऽदित्यं

चरुं निर्वपति वरो दक्षिणा ऽऽग्नावैष्णव-मेकादशकपालं

ँवामनो वही दक्षिणा ऽग्नीषोमीयम् । 1

**TS 1.8.22.5 - Last**

श्रवस्यवो घृतस्य धारा उप यन्ति विश्वतः ॥

सोमारुद्रा वि वृहतं ँविषूचीममीवा या नो गय-माविवेश ।

आरे बाधेथां निर्.ऋतिं पराचैः कृतं चिदेनः प्र मुमुक्त-मस्मत् ॥

सोमारुद्रा युव-मेतान्यस्मे विश्वा तनूषु भेषजानि धत्तं ।

अव स्यतं मुञ्चतं ँयन्नो अस्ति तनूषु बद्धं कृतमेनो अस्मत् ॥

सोमापूषणा जनना रयीणां जनना दिवो जनना पृथिव्याः ।

जातौ विश्वस्य भुवनस्य गोपौ देवा अकृण्वन्नमृतस्य नाभिं ॥

इमौ देवौ जायमानौ जुषन्तेमौ तमाꣳसि गूहता-मजुष्टा ।

आभ्यामिन्द्रः पक्वमामास्वन्तः सोमापूषभ्यां जनदुस्रियासु ॥ 42

=======

**ओं नमः परमात्मने, श्री महागणपतये नमः,**

**श्री गुरुभ्यो नमः ॥ हरिः ओं**

**TS 2.1.1.1 - First**

वायव्य॑ श्वेतमा लभेत भूतिकामो वायुर्वै क्षेपिष्ठा देवता वायुमेव
स्वेन भागधेयेनोप धावति स एवैनं भूतिं गमयति भवत्येवा–तिक्षिप्रा
देवतेत्याहुः सैनमीश्वरा प्रदह इत्येतमेव सन्तं ँवायवे नियुत्वत
आ लभेत नियुद्वा अस्य धृतिर्द्धृत एव भूतिमुपैत्यप्रदाहाय
भवत्येव । 1

**TS 2.1.11.6 - Last**

युष्मानीतो अभयं ज्योतिरश्यां ॥
आदित्यानामवसा नूतनेन सक्षीमहि शर्मणा शन्तमेन ।
अनागास्त्वे अदितित्वे तुरास इमं ँयज्ञं दधतु श्रोषमाणाः ॥
इमं मे वरुण श्रुधी हवमद्या च मृडय ।
त्वामवस्युरा चके ॥
तत्त्वा यामि ब्रह्मणा वन्दमान–स्तदाशास्ते यजमानो हविर्भिः ।
अहेडमानो वरुणेह बोद्ध्युरुश॑स मा न आयुः प्र मोषीः ॥ 65

**TS 2.2.1.1 - First**

प्रजापतिः प्रजा असृजत ताः सृष्टा इन्द्राग्नी अपागूहताꣳ सो ऽचायत्
प्रजापतिरिन्द्राग्नी वै मे प्रजा अपाघुक्षतामिति स एतमैन्द्राग्न-
मेकादशकपाल-मपश्यत् तं निरवपत् तावस्मै प्रजाः प्रासाधयता-
मिन्द्राग्नी वा एतस्य प्रजामप गूहतो यो ऽलं प्रजायै सन् प्रजां न
विन्दत ऐन्द्राग्न-मेकादशकपालं निर्वपेत् प्रजाकाम इन्द्राग्नी । **1**

**TS 2.2.12.8 - Last**

यासि दाश्वाꣳसमच्छा नियुद्भिर् वायविष्टये दुरोणे ।
नि नो रयिꣳ सुभोजसं ँयुवेह नि वीरवद्-गव्यमश्वियं च राधः ॥
रेवतीर्नः सधमाद इन्द्रे सन्तु तुविवाजाः ।
क्षुमन्तो याभिर्मदेम ॥
रेवाꣳ इद्-रेवतः स्तोता स्यात् त्वावतो मघोनः ।
प्रेदु हरिवः श्रुतस्य ॥ **71**

**TS 2.3.1.1 - First**

आदित्येभ्यो भुवद्वद्भ्यश्चरुं निर्वपेद्भूतिकाम आदित्या वा एतं भूत्यै
प्रति नुदन्ते यो ऽलं भूत्यै सन् भूतिं न प्राप्नोत्यादित्यानेव भुवद्वतः
स्वेन भागधेयेनोप धावति त एवैनं भूतिं गमयन्ति भवत्येवाऽऽदित्येभ्यो
धारयद्वद्भ्य-श्चरुं निर्वपेदपरुद्धो वा ऽपरुद्ध्यमानो वाऽऽदित्या वा
अपरोद्धार आदित्या अवगमयितार आदित्यानेव धारयद्वतः । **1**

**TS 2.3.14.6 - Last**

प्र यो जज्ञे विद्वाꣳ अस्य बन्धुं ँविश्वानि देवो जनिमा विवक्ति ।
ब्रह्म ब्रह्मण उज्जभार मद्ध्यान्नीचादुच्चा स्वधया ऽभि प्र तस्थौ ॥
महान् मही अस्तभायद्वि जातो द्याꣳ सद्म पार्थिवं च रजः ।
स बुद्ध्नादाष्ट जनुषा ऽभ्यग्रं बृहस्पतिर् देवतायस्य सम्राट् ॥
बुद्ध्नाद्-यो अग्रमभ्यर्त्योजसा बृहस्पतिमा विवासन्ति देवाः ।
भिनद्-वलं ँवि पुरो दर्दरीति कनिक्रदथ् सुवरपो जिगाय ॥ **56**

**TS 2.4.1.1 - First**

दे॒वा म॑नु॒ष्याः᳚ पि॒त॒रस्ते᳚ ऽन्यत॑ आस॒न्नसु॑रा॒ रक्षा॑ꣳसि पिशा॒चास्ते᳚

ऽन्यत॒स्तेषां᳚ दे॒वाना॑मु॒त यद॒ल्पं ँलोहि॑त॒मकु॑र्व॒न् तद्-रक्षा॑ꣳसि॒

रा॑त्रीभिरसुभ्न॒न् तान्थ् सु॒ब्धान् मृ॒ता॒नभि व्यौ᳚च्छ॒त् ते दे॒वा अ॑वि॒दु॒र्यो

वै नो॒ ऽयं म्रि॒यते॒ रक्षा॑ꣳसि॒ वा इ॒मं घ्न॒न्तीति॒ ते रक्षा॒ꣳस्यु॑पामन्त्रयन्त॒

ता॑न्यब्रु॒वन् व॑रं ँवृणामहै॒ यत् । **1**

**TS 2.4.14.5 - Last**

च॒ ॥

विश्वे॑ दे॒वा ऋ॑ता॒वृ॑ध ऋ॒तुभि॑र्. हव॒न॒श्रु॑तः ।

जु॒षन्ता॒ꣳ युज्यं॒ पयः॑ ॥

विश्वे॑ देवाः शृणु॒तेमꣳ हव॑ं मे॒ ये अ॒न्तरि॑क्षे॒ य उप॒ द्यवि॒ ष्ठ ।

ये अ॑ग्निजि॒ह्वा उ॒त वा॒ यज॑त्रा आ॒सद्या॒स्मिन् ब॒र्.हिषि मादयद्ध्वं ॥ **48**

**TS 2.5.1.1 - First**

विश्वरूपो वै त्वाष्ट्रः पुरोहितो देवानामासीथ् स्वस्रीयोऽसुराणां
तस्य त्रीणि शीर्.षाण्यासन्थ्-सोमपानꣳ सुरापान-मन्नादनꣳ
स प्रत्यक्षं देवेभ्यो भागमवदत् परोक्षमसुरेभ्यः सर्वस्मै वै प्रत्यक्षं
भागं ँवदन्ति यस्मा एव परोक्षं ँवदन्ति तस्य भाग उदित-स्तस्मादिन्द्रो
ऽबिभेदीदृङ् वै राष्ट्रं ँवि पर्यावर्तयतीति तस्य वज्रमादाय
शीर्.षाण्यच्छिनद्-यथ् सोमपानम् । **1**

**TS 2.5.12.5 - Last**

वि पाजसा वि ज्योतिषा ॥
स त्वमग्ने प्रतीकेन प्रत्योष यातुधान्यः ।
उरुक्षयेषु दीद्यत् ॥
तꣳ सुप्रतीकꣳ सुदृशꣴ स्वञ्चमविद्वाꣳसो विदुष्टरꣳ सपेम ।
स यक्ष-द्विश्वा वयुनानि विद्वान् प्र हव्यमग्निरमृतेषु वोचत् ॥
अꣳहोमुचे विवेष यन्मा वि न इन्द्रे न्द्र क्षत्रमिन्द्रियाणि
शतक्रतो ऽनु ते दायि ॥ **74**

**TS 2.6.1.1 - First**

समिधो यजति वसन्तमेवर्तूनामव रुन्धे तनूनपातं ँयजति ग्रीष्ममेवाव

रुन्ध इडो यजति वर्.षा एवाव रुन्धे बर्.हिर्यजति शरदमेवाव रुन्धे

स्वाहाकारं ँयजति हेमन्तमेवाव रुन्धे तस्माथ् स्वाहाकृता हेमन्

पशवो ऽव सीदन्ति समिधो यजत्युषस एव देवतानामव रुन्धे

तनूनपातं ँयजति यज्ञमेवाव रुन्धे । **1**

**TS 2.6.12.6 - Last**

इमं ँयम प्रस्तर–मा हि सीदाङ्गिरोभिः पितृभिः सँविदानः ।

आ त्वा मन्त्राः कविशस्ता वहन्त्वेना राजन्. हविषा मादयस्व ॥

अङ्गिरोभिरा गहि यज्ञियेभिर्यम वैरूपै–रिह मादयस्व ।

विवस्वन्त७ँ हुवे यः पिता ते ऽस्मिन्. यज्ञे बर्.हिष्याऽऽ निषद्य ॥

अङ्गिरसो नः पितरो नवग्वा अथर्वाणो भृगवः सोम्यासः ।

तेषां ँवय७ँ सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम ॥ **70**

===========

**ओं नमः परमात्मने, श्री महागणपतये नमः,**

**श्री गुरुभ्यो नमः ॥ हरिः ओं**

**TS 3.1.1.1 - First**

प्रजापतिरकामयत प्रजाः सृजेयेति स तपो ऽतप्यत स सर्पानसृजत

सो ऽकामयत प्रजाः सृजेयेति सद्वितीयमतप्यत स वयाꣳस्यसृजत

सो ऽकामयत प्रजाः सृजेयेति स तृतीयमतप्यत स एतं दीक्षितवाद-

मपश्यत् तमवदत् ततो वै स प्रजा असृजत यत् तपस्तप्त्वा

दीक्षितवादँवदति प्रजा एव तद्-यजमानः । 1

**TS 3.1.11.8 - Last**

ये विश्वे मरुतो जुनन्ति ।

क्रोशाति गर्दा कन्येव तुन्ना पेरुं तुञ्जाना पत्येव जाया ॥

घृतेन द्यावापृथिवी मधुना समुक्षत पयस्वतीः कृणुताऽऽप ओषधीः ।

ऊर्जं च तत्र सुमतिं च पिन्वथ यत्रा नरो मरुतः सिञ्चथा मधु ॥

उदुत्यं चित्रं ॥

और्वभृगुवच्छुचि-मप्नवानवदा हुवे । अग्निꣳ समुद्रवाससं ॥

आ सवꣳ सवितुर्यथा भगस्येव भुजिꣳ हुवे ।

अग्निꣳ समुद्रवाससं ॥

हुवे वातस्वनं कविं पर्जन्यक्रन्द्य॒ सहः ।

अग्नि॒ समुद्रवाससं ॥ **42**

**TS 3.2.1.1 - First**

यो वै पवमानाना-मन्वारोहान्. विद्वान्. यजतेऽनु पवमानाना रोहति न पवमानेभ्यो-ऽव च्छिद्यते श्येनोऽसि गायत्रछन्दा अनु त्वाऽऽ रभे स्वस्ति मा सं पारय सुपर्णोऽसि त्रिष्टुप्छन्दा अनु त्वाऽऽ रभे स्वस्ति मा सं पारय सघाऽसि जगतीछन्दा अनु त्वाऽऽ रभे स्वस्ति मा सं पारयेत्याहैते । **1**

**TS 3.2.11.3 - Last**

भव यजमानाय शँ योः ॥

अग्निस्त्रीणि त्रिधातून्या क्षेति विदथा कविः ।

स त्री॒रेकादशा॒ इह ॥ यक्षच्च पिप्रयच्च नो विप्रो दूतः परिष्कृतः ।

नभन्तामन्यके समे ॥

इन्द्राविष्णू दृ॒हिताः शम्बरस्य नव पुरो नवतिं च श्नथिष्टं ।

शतं ँवर्चिनः सहस्रं च साक॒ हथो अप्रत्यसुरस्य वीरान् ॥

उत माता महिष मन्ववेनदमी त्वा जहति पुत्र देवाः ।

अथाब्रवीद्-वृत्रमिन्द्रो हनिष्यन्थ्-सखे विष्णो वितरं ँवि क्रमस्व ॥ **46**

**TS 3.3.1.1 - First**

अग्ने तेजस्विन् तेजस्वी त्वं देवेषु भूयास्तेजस्वन्तं मा–मायुष्मन्तं ँ वर्चस्वन्तं मनुष्येषु कुरु दीक्षायै च त्वा तपसश्च तेजसे जुहोमि तेजोविदसि तेजो मा मा हासीन्माऽहं तेजो हासिषं मा मां तेजो हासीदिन्द्रौजस्विन्नोजस्वी त्वं देवेषु भूया ओजस्वन्तं मामायुष्मन्तं ँ वर्चस्वन्तं मनुष्येषु कुरु ब्रह्मणश्च त्वा क्षत्त्रस्य च । 1

**TS 3.3.11.5 - Last**

राकामह७ँ सुहवा७ँ सुष्टुती हुवे शृणोतु नः सुभगा बोधतु त्मना ।
सीव्यत्वपः सूच्याऽच्छिद्यमानया ददातु वीर७ँ शतदायमुक्थ्यं ॥
यास्ते राके सुमतयः सुपेशसो याभिर्ददासि दाशुषे वसूनि ।
ताभिर्नो अद्य सुमना उपागहि सहस्रपोष७ँ सुभगे रराणा ॥
सिनीवालि या सुपाणिः ॥
कुहूमह७ँ सुभगां ँ विद्मनापसमस्मिन्. यज्ञे सुहवां जोहवीमि ।
सा नो ददातु श्रवणं पितृणां तस्यास्ते देवि हविषा विधेम ॥
कुहूर् देवानाममृतस्य पत्नी हव्या नो अस्य हविषश्चिकेतु ।
सं दाशुषे किरतु भूरि वाम७ँ रायस्पोषं चिकितुषे दधातु ॥ 36

**TS 3.4.1.1 - First**

वि वा एतस्य यज्ञ ऋद्ध्यते यस्य हविरतिरिच्यते सूर्यो देवो दिविषद्भ्य इत्याह बृहस्पतिना चैवास्य प्रजापतिना च यज्ञस्य व्यृद्धमपि वपति रक्षाꣳसि वा एतत् पशुꣳ सचन्ते यदेकदेवत्य आलब्धो भूयान् भवति यस्यास्ते हरितो गर्भ इत्याह देवत्रैवैनां गमयति रक्षसामपहत्या आ वर्तन वर्तयेत्याह । **1**

**TS 3.4.11.6 - Last**

चिद्धि ते विशो यथा प्र देव वरुण व्रतं ।
मिनीमसि द्यविद्यवि ॥
यत् किञ्चेदं वरुण दैव्ये जनेऽभिद्रोहं मनुष्याश्चरामसि ।
अचित्तीयत् तव धर्मा युयोपिमिमा नस्तस्मादेनसो देव रीरिषः ॥
कितवासो यद् रिरिपुर्न दीवि यद् वा घा सत्यमुतयन्न विद्म ।
सर्वा ता विष्य शिथिरेव देवाथा ते स्याम वरुण प्रियासः ॥ **46**

**TS 3.5.1.1 - First**

पूर्णा पश्चादुत पूर्णा पुरस्तादुन्मद्ध्यतः पौर्णमासी जिगाय ।
तस्यां देवा अधि सँवसन्त उत्तमे नाक इह मादयन्तां ॥
यत्ते देवा अदधुर् भागधेयममावास्ये सँवसन्तो महित्वा ।
सा नो यज्ञं पिपृहि विश्ववारे रयिं नो धेहि सुभगे सुवीरं ॥
निवेशनी सङ्गमनी वसूनां ँविश्वा रूपाणि वसून्यावेशयन्ती ।
सहस्रपोषᳬ सुभगा रराणा सा न आ गन् वर्चसा । 1

**TS 3.5.11.5 - Last**

जातं जातवेदसि प्रियᳬ शिशीताऽतिथिं । स्योन आ गृहपतिं ॥
अग्निनाऽग्निः समिद्ध्यते कविर्गृहपतिर्युवा ।
हव्यवाड् जुह्वास्यः ॥
त्वᳮ ह्यग्ने अग्निना विप्रो विप्रेण सन्थ् सता ।
सखा सख्या समिद्ध्यसे ॥ तं मर्जयन्त सुक्रतुं पुरोयावानमाजिषु ।
स्वेषु क्षयेषु वाजिनं ॥
यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्न् ।
ते ह नाकं महिमानः सचन्ते यत्र पूर्वे साद्ध्याः सन्ति देवाः ॥ 36

==========

**ओं नमः परमात्मने, श्री महागणपतये नमः,**

**श्री गुरुभ्यो नमः ॥ हरिः ओं**

**TS 4.1.1.1 - First**

युञ्जानः प्रथमं मनस्तत्वाय सविता धियः ।

अग्निं ज्योतिर्निचाय्य पृथिव्या अद्ध्या ऽभरत् ॥

युक्त्वाय मनसा देवान्थ् सुवर्यतो धिया दिवं ।

बृहज्ज्योतिः करिष्यतः सविता प्र सुवाति तान् ॥

युक्तेन मनसा वयं देवस्य सवितुः सवे ।

सुवर्गेयाय शक्त्यै ॥

युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः ।

वि होत्रा दधे वयुनाविदेक इत् । 1

**TS 4.1.11.4 - Last**

रेजते अग्ने पृथिवी मखेभ्यः ॥ विश्वे देवा विश्वे देवाः ॥

द्यावा नः पृथिवी इमꣳ सिद्ध्रमद्य दिविस्पृशं ।

यज्ञं देवेषु यच्छतां ॥

प्र पूर्वजे पितरा नव्यसीभिर्गीर्भिः कृणुद्ध्वꣳ सदने ऋतस्य ।

आ नो द्यावापृथिवी दैव्येन जनेन यातं महि वां ँवरूथं ॥

अग्नि॑ स्तोमेन बोधय समिधानो अमर्त्यं । हव्या देवेषु नो दधत् ॥

स हव्यवाडमर्त्य उशिग्दूतश्चनोहितः । अग्निर्धिया समृण्वति ॥

शम् नो भवन्तु वाजेवाजे ॥ **46**

**TS 4.2.1.1 - First**

विष्णोः क्रमो ऽस्यभिमातिहा गायत्रं छन्द आ रोह पृथिवीमनु

वि क्रमस्व निर्भक्तः स यं द्विष्मो विष्णोः क्रमो ऽस्यभिशस्तिहा

त्रैष्टुभं छन्द आ रोहान्तरिक्षमनु वि क्रमस्व निर्भक्तः स यं द्विष्मो

विष्णोः क्रमोऽस्यरातीयतो हन्ता जागतं छन्द आ रोह दिवमनु

वि क्रमस्व निर्भक्तः स यं द्विष्मो विष्णोः । **1**

**TS 4.2.11.3 - Last**

को अद्य युङ्क्ते धुरि गा ऋतस्य शिमीवतो भामिनो दुर्.हृणायून् ।

आसन्निषून् हृथ्स्वसो मयोभून्. य एषां भृत्यामृणधथ् स जीवात् ॥

अग्ने नयाऽऽ देवाना॒ँ शन्नो भवन्तु वाजेवाजे ॥

अफ्स्वग्ने सधिष्टव सौषधीरनु रुद्ध्यसे । गर्भे सन् जायसे पुनः ॥

वृषा सोम द्युमा॒ँ असि वृषा देव वृषव्रतः । वृषा धर्माणि दधिषे ॥

इमं मे वरुण तत्त्वा यामि त्वं नो अग्ने स त्वं नो अग्ने ॥ **48**

**TS 4.3.1.1 - First**

अपां त्वेमन्थ् सादयाम्यपां त्वोद्मन्थ् सादयाम्यपां त्वा भस्मन्थ्

सादयाम्यपां त्वा ज्योतिषि सादयाम्यपां त्वाऽयने सादयाम्यर्णवे सदने

सीद समुद्रे सदने सीद सलिले सदने सीदापां क्षये सीदापाᳶ सधिषि

सीदापां त्वा सदने सादयाम्यपां त्वा सधस्थे सादयाम्यपां त्वा पुरीषे

सादयाम्यपां त्वा योनौ सादयाम्यपां त्वा पाथसि सादयामि गायत्री

छन्द-स्त्रिष्टुप् छन्दो जगती छन्दोऽनुष्टुप् छन्दः पङ्क्ति श्छन्दः ॥ 1

**TS 4.3.13.8 - Last**

चित् पथा ।

श्चोतन्ति कोशा उप वो रथेष्वा घृत-**मुक्षता** मधुवर्ण-मर्चते ॥

अग्निमग्निᳶ हवीमभिः सदा हवन्त विश्पतिं ।

हव्यवाहं पुरुप्रियं ॥

तᳶ हि शश्वन्त ईडते स्रुचा देवं घृतश्चुता ।

अग्निᳶ हव्याय वोढवे ॥

इन्द्राग्नी रोचना दिवः श्ञथद् वृत्र-मिन्द्रं ँवो विश्वतस्परीन्द्रं नरो

विश्वकर्मन्. हविषा वावृधानो विश्वकर्मन्. हविषा वर्द्धनेन ॥ 36

**TS 4.4.1.1 - First**

रश्मिरसि क्षयाय त्वा क्षयं जिन्व प्रेतिरसि धर्माय त्वा धर्मं
जिन्वान्विति-रसि दिवे त्वा दिवं जिन्व सन्धि-रस्यन्तरिक्षाय त्वा
ऽन्तरिक्षं जिन्व प्रतिधिरसि पृथिव्यै त्वा पृथिवीं जिन्व विष्टंभोऽसि
वृष्ट्यै त्वा वृष्टिं जिन्व प्रवा ऽस्यह्ने त्वा ऽहर्जिन्वानु वाऽसि रात्रियै
त्वा रात्रिं जिन्वोशिगसि । **1**

**TS 4.4.12.5 - Last**

गृणाहि ।
घृतवती सवित-राधिपत्यैः पयस्वती रन्ति-राशा नो अस्तु ॥
ध्रुवा दिशां ँविष्णुपत्न्यघोरा ऽस्येशाना सहसो या मनोता ।
बृहस्पतिर् मातरिश्वोत वायुः सन्धुवाना वाता अभि नो गृणन्तु ॥
विष्टंभो दिवो धरुणः पृथिव्या अस्येशाना जगतो विष्णुपत्नी ।
विश्वव्यचा इषयन्ती सुभूतिः शिवा नो अस्त्वदितिरुपस्थे ॥
वैश्वानरो न ऊत्या पृष्टो दिव्यनु नो ऽद्यानुमति-रन्विदनुमते त्वं
कया नश्चित्र आ भुवत् को अद्य युङ्क्ते ॥ **37**

**TS 4.5.1.1 - First**

नमस्ते रुद्र मन्यव उतो त इषवे नमः ।

नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः ॥

या त इषुः शिवतमा शिवं बभूव ते धनुः ।

शिवा शरव्या या तव तया नो रुद्र मृडय ॥

या ते रुद्र शिवा तनूरघोरा ऽपापकाशिनी ।

तया नस्तनुवा शन्तमया गिरिशन्ताभि चाकशीहि ॥

यामिषुं गिरिशन्त हस्ते । **1**

**TS 4.5.11.2 - Last**

प्रचरन्ति सृकावन्तो निषङ्गिणः ॥

य एतावन्तश्च भूया७्ँसश्च दिशो रुद्रा वितस्थिरे ॥

तेषा७्ँ सहस्रयोजने ऽवधन्वानि तन्मसि ॥

नमो रुद्रेभ्यो ये पृथिव्यां ँँयेऽन्तरिक्षे ये दिवि येषामन्नं

ँँवातो वर्.षमिषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्

दशोदीचीर् दशोर्ध्वा-स्तेभ्यो नमस्ते नो मृडयन्तु ते यं

द्विष्मो यश्च नो द्वेष्टि तं ँँवो जंभे दधामि ॥ **27**

**TS 4.6.1.1 - First**

अश्मन्नूर्जं पर्वते शिश्रियाणां ँवाते पर्जन्ये वरुणस्य शुष्मे ।
अद्भ्य ओषधीभ्यो वनस्पतिभ्योऽधि संभृतां तां न इषमूर्जं
धत्त मरुतः स७ँरराणाः ॥
अश्म७ँस्ते क्षुदमुं ते शुगृच्छतु यं द्विष्मः ॥
समुद्रस्य त्वाऽ*वाकया ऽग्ने परि व्ययामसि ।
पावको अस्मभ्य७ँ शिवो भव ॥
हिमस्य त्वा जरायुणा ऽग्ने परि व्ययामसि ।
पावको अस्मभ्य७ँ शिवो भव ॥
उप । 1

**TS 4.6.9.4 - Last**

प्रिय आत्माऽपियन्तं मा स्वधितिस्तनुव आ तिष्ठिपत् ते ।
मा ते गृद्ध्नु-रविशस्ता ऽतिहाय छिद्रा गात्राण्यसिना मिथू कः ॥
न वा उ-वेतन्म्रियसे न रिष्यसि देवा७ँ इदेषि पथिभिः सुगेभिः ।
हरी ते युञ्जा पृषती अभूतामुपास्थाद्-वाजी धुरि रासभस्य ॥
सुगव्यं नो वाजी स्वश्वियं पु७ँसः पुत्रा७ँ उत विश्वापुष७ँ रयिं ।
अनागास्त्वं नो अदितिः कृणोतु क्षत्रं नो अश्वो वनता७ँ हविष्मान् ॥ 46

**TS 4.7.1.1 - First**

अग्नाविष्णू सजोषसेमा वर्द्धन्तु वां गिरः ।

द्युम्नैर्वाजेभि-रा गतं ॥

वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे

धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे

श्रावश्च मे श्रुतिश्च मे ज्योतिश्च मे सुवश्च मे प्राणश्च मे ऽपानः । **1**

**TS 4.7.15.7 - Last**

आगः ।

कृधी स्वस्माꣳ अदितेरनागा व्येनाꣳसि शिश्रथो विष्वगग्ने ॥

यथा ह तद् वसवो गौर्यं चित् पदि षिता ममुञ्चता यजत्राः ।

एवा त्वमस्मत् प्र मुञ्चा व्यꣳहः प्रातार्यग्ने प्रतरान्न आयुः ॥ **39**

========

**ओं नमः परमात्मने, श्री महागणपतये नमः,**

**श्री गुरुभ्यो नमः , हरिः ओं**

**TS 5.1.1.1 - First**

सावित्राणि जुहोति प्रसूत्यै चतुर्गृहीतेन जुहोति चतुष्पादः पशवः
पशूनेवा ऽव रुन्धे चतस्रो दिशो दिक्ष्वेव प्रति तिष्ठति छन्दा(ग्ं)सि
देवेभ्यो ऽपाऽक्रामन् न वो ऽभागानि हव्यं ँवक्ष्याम इति तेभ्य
एतच्चतुर्गृहीत-मधारयन् पुरोनुवाक्यायै याज्यायै देवतायै
वषट्काराय यच्चतुर्गृहीतं जुहोति छन्दा(ग्ं)स्येव तत् प्रीणाति
तान्यस्य प्रीतानि देवेभ्यो हव्यं ँवहन्ति यं कामयेत । **1**

**TS 5.1.11.4 - Last**

त्वष्टेदं ँविश्वं भुवनं जजान बहोः कर्तारमिह यक्षि होतः ॥
अश्वो घृतेन त्मन्या समक्त उप देवा(ग्ं) ऋतुशः पाथ एतु ।
वनस्पति-र्देवलोकं प्रजानन्नग्निना हव्या स्वदितानि वक्षत् ॥
प्रजापतेस्तपसा वावृधानः सद्यो जातो दधिषे यज्ञमग्ने ।
स्वाहाकृतेन हविषा पुरोगा याहि साद्ध्या हविरदन्तु देवाः ॥ **59**

**TS 5.2.1.1 - First**

विष्णुमुखा वै देवा श्छन्दोभिरिमान् ँल्लोकाननपजय्य मभ्यजयन्.

यद्-विष्णुक्रमान् क्रमते विष्णुरेव भूत्वा यजमान श्छन्दोभिरिमान्

ँल्लोकाननपजय्यमभि जयति विष्णोः क्रमोऽस्यभिमातिहेत्याह गायत्री

वै पृथिवी त्रैष्टुभमन्तरिक्षं जागती द्यौरानुष्टुभीर्दिश श्छन्दोभिरेवेमान्

ँल्लोकान्. यथापूर्वमभि जयति प्रजापतिरग्निमसृजत

सोऽस्माथ् सृष्टः । 1

**TS 5.2.12.2 - Last**

सूदयन्तु ते ॥

पृथिवी ते ऽन्तरिक्षेण वायु श्छिद्रं भिषज्यतु ।

द्यौ स्ते नक्षत्रैः सह रूपं कृणोतु साधुया ॥

शं ते परेभ्यो गात्रेभ्यः शमस्त्ववरेभ्यः ।

शमस्थभ्यो मज्जभ्यः शमु ते तनुवे भुवत् ॥ 64

**TS 5.3.1.1 - First**

उथ्सन्नयज्ञो वा एष यदग्निः किं ँवाऽहैतस्य क्रियते किं ँवा न यद्-वै यज्ञस्य क्रियमाणस्या-न्तर्यन्ति पूयति वा अस्य तदाश्विनीरुप दधात्यश्विनौ वै देवानां भिषजौ ताभ्यामेवास्मै भेषजं करोति पञ्चोप दधाति पाङ्क्तो यज्ञो यावानेव यज्ञस्तस्मै भेषजं करोत्यृतव्या उप दधात्यृतूनां क्लृप्त्यै । 1

**TS 5.3.12.2 - Last**

तरति तरति ब्रह्महत्यां ँयोऽश्वमेधेन यजते य उ चैनमेवं ँवेदोत्तरं ँवै तत् प्रजापतेरक्ष्यश्वयत् तस्मादश्वस्योत्तरतोऽव द्यन्ति दक्षिणतोऽन्येषां पशूनां ँवैतसः कटो भवत्यप्सुयोनिर्वा अश्वोऽप्सुजो वेतसः स्व एवैनं ँयोनौ प्रति ष्ठापयति चतुष्टोमः स्तोमो भवति सरड्ढ वा अश्वस्य सक्थ्या ऽवृहत् तद्-देवाश्चतुष्टोमेनैव प्रत्यदधुर्यच्चतुष्टोमः स्तोमो भवत्यश्वस्य सर्वत्वाय ॥ 48

**TS 5.4.1.1 - First**

देवासुराः सँयत्ता आसन् ते न व्यजयन्त स एता इन्द्रस्तनूरपश्यत् ता उपाधत्त ताभिर्वै स तनुवमिन्द्रियं ँवीर्यमात्मन्नधत्त ततो देवा अभवन् परा ऽसुरा यदिन्द्रतनूरुपदधाति तनुवमेव ताभिरिन्द्रियं ँवीर्यं ँयजमान आत्मन् धत्ते ऽथो सेन्द्रमेवाग्निꣳ सतनुं चिनुते भवत्यात्मना पराऽस्य भ्रातृव्यः । **1**

**TS 5.4.12.3 - Last**

यत ईश्वरो वा अश्वो ऽयतो ऽप्रतिष्ठितः परां परावतं गन्तोर्यत् पार्थुरश्मं ब्रह्मसामं भवत्यश्वस्य यत्यै धृत्यै संकृत्यच्छावाकसामं भवत्युथ्सन्नयज्ञो वा एष यदश्वमेधः क स्तद्–वेदेत्याहुर्यदि सर्वो वा क्रियते न वा सर्व इति यथ् संकृत्यच्छावाकसामं भवत्यश्वस्य सर्वत्वाय पर्याप्त्या अनन्तरायाय सर्वस्तोमो ऽतिरात्र उत्तममहर्भवति सर्वस्याऽऽप्त्यै सर्वस्य जित्यै सर्वमेव तेनाऽऽप्नोति सर्वं जयति ॥ **58**

**TS 5.5.1.1 - First**

यदेकेन स॒ꣳस्थापयति य॒ज्ञस्य॒ सन्त॑त्या॒ अविच्छेदायै॒न्द्राः प॒शवो॒

ये मु॒ष्करा य॒दैन्द्राः सन्तो॒ऽग्निभ्य॒ आल॒भ्यन्ते दे॒वता॒भ्यः सम॒दं

दधात्याग्ने॒यी स्त्रि॒ष्टुभो याज्यानुवा॒क्याः कु॒र्याद्-यदाग्ने॒यीस्तेना

ऽऽग्ने॒या यत् त्रि॒ष्टु॒भस्ते॒नैन्द्राः समृ॒द्ध्यै न दे॒वताभ्यः स॒मदं

दधाति वा॒यवे नि॒युत्व॑ते तू॒परमा लभ॒ते तेजो॒ ऽग्नेर्वा॒यु स्तेजस ए॒ष

आ लभ्य॒ते त॒स्माद्-य॒द्रियङ् वा॒युः । 1

**TS 5.5.24.1 - Last**

अ॒ग्नयेऽनीकव॒ते रोहिताञ्जि-र॒नड्वा॒नधोरामौ सावि॒त्रौ पौ॒ष्णौ

र॒जतनाभी वैश्वदे॒वौ पि॒शङ्गौ तू॒परौ मारु॒तः क॒ल्माष आग्ने॒यः

कृ॒ष्णो ऽजः सारस्व॒ती मे॒षी वारु॒णः कृ॒ष्ण एकशितिपा॒त् पेत्वः ॥ 62

**TS 5.6.1.1 - First**

हिरण्यव॒र्णाः शुचयः पा॒वका या॒सु जा॒तः क॒श्यपो॒ यास्विन्द्रः ।

अ॒ग्निं ँया ग॒र्भं द॒धिरे वि॒रूपा॒स्ता न॒ आप॒ः शꣳ स्यो॒ना भवन्तु ॥

या॒सा॒ꣳ राजा॒ वरुणो॒ या॒ति मद्ध्ये सत्यानृते अ॒वप॒श्य॒न् जनानां ।

म॒धु॒श्चु॒तः शुचयो॒ याः पा॒वकास्ता न॒ आप॒ः शꣳ स्यो॒ना भवन्तु ॥

यासां दे॒वा दि॒वि कृ॒ण्वन्ति भ॒क्षं ँया अ॒न्तरिक्षे ब॒हुधा भवन्ति ।

याः पृ॒थिवीं पयसो॒न्दन्ति । 1

**TS 5.6.23.1- Last**

पिशङ्गा स्त्रयो वासन्ताः सारङ्गा स्त्रयो ग्रैष्माः पृषन्त स्त्रयो वार्.षिकाः पृश्ञय स्त्रयः शारदाः पृश्ञिसक्था स्त्रयो हैमन्तिका अवलिप्ता स्त्रयः शैशिराः सँवथ्सराय निवक्षसः ॥ 54

**TS 5.7.1.1 - First**

यो वा अयथादेवतमग्निं चिनुत आ देवताभ्यो वृश्च्यते पापीयान् भवति यो यथादेवतं न देवताभ्य आ वृश्च्यते वसीयान् भवत्याग्नेय्या गायत्रिया प्रथमां चितिमभि मृशेत् त्रिष्टुभा द्वितीयां जगत्या तृतीयामनुष्टुभा चतुर्थीं पङ्क्त्या पञ्चमीं ँयथादेवतमेवाग्निं चिनुते न देवताभ्य आ वृश्च्यते वसीयान् भवतीडायै वा एषा विभक्तिः पशव इडा पशुभिरेनं । 1

**TS 5.7.26.1 - Last**

अग्निः पशुरासीत् तेनायजन्त स एतं ँलोकमजयद्-यस्मिन्नग्निः स ते लोकस्तं जेष्यस्यथाव जिघ्र वायुः पशुरासीत् तेनायजन्त स एतं ँलोकमजयद्-यस्मिन् वायुः स ते लोकस्तस्मात् त्वा ऽन्त-रेष्यामि यदि नावजिघ्रस्यादित्यः पशुरासीत् तेनायजन्त स एतं ँलोकमजयद् यस्मिन्नादित्यः स ते लोकस्तं जेष्यसि यद्यवजिघ्रसि ॥ 58

============

**ओं नमः परमात्मने, श्री महागणपतये नमः,**

**श्री गुरुभ्यो नमः, हरिः ओं**

**TS 6.1.1.1 - First**

प्राचीनव॒ꣳशं करोति देवमनु॒ष्या दिशो॒ व्यभजन्त॒ प्राचीं दे॒वा

द॒क्षि॒णा पि॒तरः प्र॒तीचीं मनु॒ष्या उदीचीꣳ रु॒द्रा यत् प्रा॒चीनव॒ꣳशं

क॒रोति देवलो॒कमे॒व तद्–यजमान उ॒पावर्त॒ते परि श्रयत्य॒न्तर्.हि॒तो

हि दे॒वलो॒को मनुष्यलो॒का–न्नास्माल्लो॒काथ् स्वेतव्यमि॒वेत्या॒हुः

को हि तद्–वे॒द य॒द्यमुष्मिँ॒ल्लोके ऽस्ति वा॒ न वेति

दि॒क्ष्वतीका॒शान् करोति । 1

**TS 6.1.11.6 - Last**

क्री॒तः सो॒म उपनद्धो॒ नमो मि॒त्रस्य॒ वरुणस्य॒ चक्ष॒स इत्या॒ह

शान्त्या॒ आ सोम॒ꣳ वहन्त्य॒ग्निना॒ प्रति तिष्ठ॒ते तौ सं॒भव॒न्तौ

यजमानम॒भि सं भवतः पु॒रा खलु॒ वावैष मेधाया॒ऽऽत्मानमा॒रभ्य

चरति॒ यो दीक्षि॒तो यदग्नीषो॒मीयं॒ पशु॒माल॒भत आत्मनि॒ष्क्रयण

ए॒वास्य॒ स तस्मा॒त् तस्य॒ नाऽऽश्यं पुरुषनि॒ष्क्रयण इव॒ ह्यथो॒

खल्वाहु॒ रग्नीषोमाभ्या॒ꣳ वा इन्द्रो वृ॒त्रमह॒न्निति॒ यदग्नीषो॒मीयं

पशुमालभते वार्त्रघ्न एवास्य स तस्माद्वाश्यं ँवारुण्यर्चा परि

चरति स्वयैवैनं देवतया परि चरति ॥ **76**

**TS 6.2.1.1 - First**

यदुभौ विमुच्याऽऽतिथ्यं गृह्णीयाद्-यज्ञं ँवि च्छिन्द्याद्-यदुभावविमुच्य

यथा ऽनागतायाऽऽतिथ्यं क्रियते तादृगेव तद्-विमुक्तो-

ऽन्योऽनड्वान् भवत्यविमुक्तो ऽन्यो ऽथाऽऽतिथ्यं गृह्णाति यज्ञस्य सन्तत्यै

पत्न्यन्वारभते पत्नी हि पारीणह्यस्येशे पत्नियैवानुमतं निर्वपति यद्-वै

पत्नी यज्ञस्य करोति मिथुनं तदथो पत्निया एव । **1**

**TS 6.2.11.4 - Last**

प्राणा उपरवा हनू अधिषवणे जिह्वा चर्म ग्रावाणो दन्ता

मुखमाहवनीयो नासिको-त्तरवेदि-रुदर९ सदो यदा खलु वै

जिह्वया दथ्स्वधि खादत्यथ मुखं गच्छति यदा मुखं गच्छत्यथोदरं

गच्छति तस्माद्धविर्द्धाने चर्मन्नधि ग्रावभि-रभिषुत्याऽऽहवनीये हुत्वा

प्रत्यञ्चः परेत्य सदसि भक्षयन्ति यो वै विराजो यज्ञमुखे दोहं ँवेद

दुह एवै नामियं ँवै विराट् तस्यै त्वक् चर्मोधो ऽधिषवणे स्तना उपरवा

ग्रावाणो वथ्सा ऋत्विजो दुहन्ति सोमः पयो य एवं ँवेद दुह

एवैनां ॥ **59**

**TS 6.3.1.1 - First**

चात्वालाद्-धिष्णियानुप वपति योनिर्वै यज्ञस्य चात्वालं ँयज्ञस्य सयोनित्वाय देवा वै यज्ञं परा ऽजयन्त तमाग्नीद्ध्रात् पुनरपाजयन्नेतद् वै यज्ञस्या-पराजितं ँयदाग्नीद्ध्रं ँयदाग्नीद्ध्राद्-धिष्णियान्. विहरति यदेव यज्ञस्या-पराजितं तत एवैनं पुनस्तनुते पराजित्येव खलु वा एते यन्ति ये बहिष्पवमान॑ सर्पन्ति बहिष्पवमाने स्तुते । **1**

**TS 6.3.11.6 - Last**

पुरस्तादसृजत पशुं मद्ध्यतः पृषदाज्यं पश्चात् तस्मादाज्येन प्रयाजा इज्यन्ते पशुना मद्ध्यतः पृषदाज्येना-नूयाजा-स्तस्मादेतन्मिश्रमिव पश्चाथ्सृष्ट॑ ह्येकादशानूयाजान्. यजति दश वै पशोः प्राणा आत्मैकादशो यावानेव पशुस्तमनु यजति घ्नन्ति वा एतत् पशुं ँयथ् सं.ज्ञपयन्ति प्राणापानौ खलु वा एतौ पशूनां ँयत् पृषदाज्यं ँयत् पृषदाज्येना नूयाजान्. यजति प्राणापानावेव पशुषु दधाति ॥ **62**

**TS 6.4.1.1 - First**

यज्ञेन वै प्रजापतिः प्रजा असृजत ता उपयड्भि-रेवासृजत यदुपयज उपयजति प्रजा एव तद् यजमानः सृजते जघनार्द्धादव द्यति जघनार्द्धाद्धि प्रजाः प्रजायन्ते स्थविमतो ऽव द्यति स्थविमतो हि प्रजाः प्रजायन्ते ऽसंभिन्दन्नव द्यति प्राणाना-मसंभेदाय न पर्यावर्तयति यत् पर्यावर्तयेदुदावर्तः प्रजा ग्राहुकः स्याथ् समुद्रं गच्छ स्वाहेत्याह रेतः । 1

**TS 6.4.11.4 - Last**

तत् प्रजा अभि जिघ्रति तस्माद् वथ्सं जातं गौरभि जिघ्रत्यात्मा वा एष यज्ञस्य यदाग्रयणः सवनेसवने ऽभि गृह्णात्यात्मन्नेव यज्ञ॑ सं तनोत्युपरिष्टादा नयति रेत एव तद् दधात्यधस्तादुप गृह्णाति प्र जनयत्येव तद्-ब्रह्मवादिनो वदन्ति कस्माथ् सत्याद्-गायत्री कनिष्ठा छन्दसा॑ सती सर्वाणि सवनानि वहतीत्येष वै गायत्रियै वथ्सो यदाग्रयणस्तमेव तदभिनिवर्त॑ सर्वाणि सवनानि वहति तस्माद् वथ्समपाकृतं गौरभि नि वर्तते ॥ 51

**TS 6.5.1.1 - First**

इन्द्रो वृत्राय वज्रमुदयच्छथ् स वृत्रो वज्रादुद्यतादबिभेथ् सो ऽब्रवीन्मा मे प्र हा–रस्ति वा इदं मयि वीर्यं तत् ते प्र दास्यामीति तस्मा उक्थ्यं प्रायच्छत् तस्मै द्वितीयमुदयच्छथ् सो ऽब्रवीन्मा मे प्र हारस्ति वा इदं मयि वीर्यं तत् ते प्र दास्यामीति । **1**

**TS 6.5.11.4 - Last**

व्याचर्छथ् स आत्मन्नारमणं नाविन्दथ् स एताननुसवनं पुरोडाशानपश्यत् तान् निरवपत् तैर्वै स आत्मन्नारमण–मकुरुत तस्मादनुसवनं पुरोडाशा निरुप्यन्ते तस्मादनुसवनं पुरोडाशानां प्राश्ञीयादात्म–न्नेवाऽऽरमणं कुरुते नैनꣳ सोमो ऽति पवते ब्रह्मवादिनो वदन्ति **नर्चा** न यजुषा पङ्क्तिराप्यतेऽथ किँ यज्ञस्य पाङ्क्तत्वमिति धानाः करंभः परिवापः पुरोडाशः पयस्या तेन पङ्क्तिराप्यते तद्–यज्ञस्य पाङ्क्तत्वं ॥ **42**

**TS 6.6.1.1 - First**

सुवर्गाय वा एतानि लोकाय हूयन्ते यद्-दाक्षिणानि द्वाभ्यां

गार्.हपत्ये जुहोति द्विपाद्-यजमानः प्रतिष्ठित्या आग्नीद्ध्रे

जुहोत्यन्तरिक्ष एवा ऽऽक्रमते सदो ऽभ्यैति सुवर्गमेवैनं ँल्लोकं गमयति

सौरीभ्यामृग्भ्यां गार्.हपत्ये जुहोत्यमुमेवैनं ँल्लोकꣳ समारोहयति

नयवत्यर्चा ऽऽग्नीद्ध्रे जुहोति सुवर्गस्य लोकस्याभिनीत्यै दिवं गच्छ

सुवः पतेति हिरण्यम् ।

**TS 6.6.11.6 - Last**

चतुष्पद एव पशूनव रुन्धे द्वे उत्तरे द्विपद एवाव रुन्धे

ऽनुष्टुभमभि सं पादयन्ति वाग्वा अनुष्टुप् तस्मात् प्राणानां

ँवागुत्तमा समयाविषिते सूर्ये षोडशिनः स्तोत्र-मुपाकरोत्येतस्मिन्

वै लोक इन्द्रो वृत्रमहन्थ् साक्षादेव वज्रं भ्रातृव्याय

प्र हर-त्यरुणपिशङ्गो ऽश्वो दक्षिणैतद्-वै वज्रस्य रूपꣳ

समृद्ध्यै ॥ 43

==========

**ओं नमः परमात्मने, श्री महागणपतये नमः,**

**श्री गुरुभ्यो नमः, हरिः ओं**

**TS 7.1.1.1 - First**

प्रजननं ज्योतिरग्नि-र्देवतानां ज्योतिर्विराट् छन्दसां ज्योतिर्विराड्
वाचो ऽग्नौ सं तिष्ठते विराजमभि सं पद्यते तस्मात् तज्ज्योतिरुच्यते
द्वौ स्तोमौ प्रातस्सवनं ँवहतो यथा प्राणश्चाऽपानश्च द्वौ माद्ध्यन्दिन॒ꣳ
सवनं ँयथा चक्षुश्च श्रोत्रं च द्वौ तृतीयसवनं ँयथा वाक् च प्रतिष्ठा
च पुरुषसम्मितो वा एष यज्ञो ऽस्थूरिः । 1

**TS 7.1.20.1 - Last**

अग्नये स्वाहा वायवे स्वाहा सूर्याय स्वाहर्तमस्यृतस्यर्तमसि
सत्यमसि सत्यस्य सत्यमस्यृतस्य पन्था असि देवानां छायाऽमृतस्य
नाम तथ् सत्यं ँयत् त्वं प्रजापतिरस्यधि यदस्मिन् वाजिनीव शुभः
स्पर्द्धन्ते दिवः सूर्येण विशोऽपो वृणानः पवते कव्यन् पशुं न गोपा
इर्यः परिज्मा ॥ 52

**TS 7.2.1.1 - First**

सा॒द्ध्या वै दे॒वाः सु॑व॒र्गका॑मा ए॒तꣳ ष॑ड्रा॒त्रम॑पश्य॒न् तमाऽह॑र॒न्

तेना॑यजन्त॒ ततो॒ वै ते सु॑व॒र्गं ँलो॒कमा॑य॒न्. य ए॒वं ँवि॒द्वाꣳस॑ः

षड्रा॒त्रमास॑ते सुव॒र्गमे॒व लो॒कं ँय॑न्ति देवस॒त्रं ँवै ष॑ड्रा॒त्रः

प्र॒त्यक्ष॒ꣳ॒ ह्ये॑ता॑नि पृ॒ष्ठानि॒ य ए॒वं ँवि॒द्वाꣳस॑ः षड्रा॒त्रमास॑ते

सा॒क्षादे॒व दे॒वता॑ अ॒भ्यारो॑हन्ति॒ षड्रा॒त्रो भ॑वति॒ षड् वा ऋ॒त॒वः

षट् पृ॒ष्ठानि॑ । **1**

**TS 7.2.20.1 - Last**

श॒ताय॒ स्वाहा॑ स॒हस्रा॑य॒ स्वाहा॒ ऽयुता॑य॒ स्वाहा॑ नि॒युता॑य॒ स्वाहा᳚

प्र॒यु॑ताय॒ स्वाहा ऽर्बु॑दाय॒ स्वाहा॒ न्य॑र्बुदाय॒ स्वाहा॑ समु॒द्राय॒ स्वाहा॒

मद्ध्या॑य॒ स्वाहा ऽन्ता॑य॒ स्वाहा॑ परा॒र्द्धाय॒ स्वाहो॒षसे॒ स्वाहा॒

व्यु॑ष्ट्यै॒ स्वाहो॑देष्य॒ते स्वाहो᳚द्य॒ते स्वाहोदि॑ताय॒ स्वाहा॑ सुव॒र्गाय॒ स्वाहा॑

लो॒काय॒ स्वाहा॒ सर्व॑स्मै॒ स्वाहा᳚ ॥ **50**

**TS 7.3.1.1 - First**

प्रजवं ँवा एतेन यन्ति यद्-दशममहः पापावहीयं ँवा एतेन भवन्ति
यद्-दशममहर्यो वै प्रजवं ँयतामपथेन प्रतिपद्यते यः स्थाणु८ं हन्ति
यो भ्रेषं न्येति स हीयते स यो वै दशमेऽहन्नविवाक्य उपहन्यते स
हीयते तस्मै य उपहताय व्याह तमेवान्वारभ्य समश्नुते ऽथ
यो व्याह सः । **1**

**TS 7.3.20.1 - Last**

वनस्पतिभ्यः स्वाहा मूलेभ्यः स्वाहा तूलेभ्यः स्वाहा स्कन्धोभ्यः
स्वाहा शाखाभ्यः स्वाहा पर्णेभ्यः स्वाहा पुष्पेभ्यः स्वाहा फलेभ्यः
स्वाहा गृहीतेभ्यः स्वाहा ऽगृहीतेभ्यः स्वाहा ऽवपन्नेभ्यः स्वाहा
शयानेभ्यः स्वाहा शिष्टाय स्वाहा ऽतिशिष्टाय स्वाहा परिशिष्टाय स्वाहा
स८ंशिष्टाय स्वाहोच्छिष्टाय स्वाहा रिक्ताय स्वाहा ऽरिक्ताय स्वाहा
प्ररिक्ताय स्वाहा स८ंरिक्ताय स्वाहोद्रिक्ताय स्वाहा सर्वस्मै स्वाहा ॥ **42**

**TS 7.4.1.1 - First**

बृह॒स्पति॑रकामयत॒ श्रन्मे॑ दे॒वा दधी॑र॒न् गच्छे॑यं पु॒रोधा॒मिति॒ स

ए॒तं च॑तुर्वि॒ꣳ॒शतिरा॒त्र–म॑पश्य॒त् तमा ऽह॑र॒त् तेना॑यजत॒ ततो॒ वै

तस्मै॒ श्रद्–दे॒वा अद॑ध॒ता॑गच्छत् पु॒रोधा॒ꣳ॒ य ए॒वं ँवि॒द्वाꣳ॑स–

श्चतुर्वि॒ꣳ॒शतिरा॒त्र–मास॑ते॒ श्रदे᳚भ्यो मनु॒ष्या॑ दध॑ते॒ गच्छ॑न्ति पु॒रोधां॑

ज्योति॒र्गौरायु॒रिति॑ त्र्य॒हा भ॑वन्ती॒यं ँवाव ज्योति॒रन्त॑रि॒क्षं

गौ॒र॑सावायुः । **1**

**TS 7.4.22.1 - Last**

सि॒ता॒य स्वाहा ऽसि॑ता॒य स्वाहा॒ ऽभि॑हिता॒य स्वाहा ऽनभि॑हिता॒य स्वाहा॑

यु॒क्ता॒य स्वाहा ऽयु॑क्ता॒य स्वाहा॒ सु॒यु॑क्ता॒य स्वाहोद्यु॑क्ता॒य स्वाहा॒ विमु॑क्ता॒य

स्वाहा॒ प्र॑मुक्ता॒य स्वाहा॒ वञ्च॑ते॒ स्वाहा॑ परि॒वञ्च॑ते॒ स्वाहा॑ सं॒ँवञ्च॑ते॒

स्वाहा॑ ऽनु॒वञ्च॑ते॒ स्वाहो॒द् –वञ्च॑ते॒ स्वाहा॑ य॒ते स्वाहा॒ धाव॑ते॒ स्वाहा॒

ति॑ष्ठ॒ते स्वा॑हा॒ सर्व॑स्मै॒ स्वाहा᳚ ॥ **53**

**TS 7.5.1.1 - First**

गावो वा एतथ् सत्र-मासताशृङ्गाः सतीः शृङ्गाणि नो जायन्ता इति
कामेन तासां दशमासा निषण्णा आसन्नथ शृङ्गाण्यजायन्त
ता उदतिष्ठन्नराथ्स्मेत्यथ यासां नाजायन्त ताः सँवथ्सर-माप्त्वोदतिष्ठ-
न्नराथ्स्मेति यासां चाजायन्त यासां च न ता उभयीरु-दतिष्ठ-
न्नराथ्स्मेति गोसत्रं वै । 1

**TS 7.5.25.2 - Last**

समुद्र उदरमन्तरिक्षं पायुर्द्यावापृथिवी आण्डौ ग्रावा शेपः
सोमो रेतो यज्जञ्जभ्यते तद्-वि द्योतते यद्-विधूनुते तथ् स्तनयति
यन्मेहति तद्-वर्.षति वागेवास्य वागहर्वा अश्वस्य जायमानस्य महिमा
पुरस्ताज्जायते रात्रिरेनं महिमा पश्चादनु जायत एतौ वै महिमाना-
वश्वमभितः सं बभूवतुर्. हयो देवानवह दर्वाऽसुरान्. वाजी
गन्धर्वानश्वोमनुष्यान्थ् समुद्रो वा अश्वस्य योनिः समुद्रो बन्धुः ॥ 54

# ॥ इति तैत्तिरीयसंहिता समाप्ता ॥

=======

**T.A.7.42.6**

आभिर् गीर्भिर् यदतो न ऊनमाप्यायय हरिवो वर्द्धमानः ।

यदा स्तोतृभ्यो महि गोत्रा रुजासि भूयिष्ठभाजो अध ते स्याम ॥

ब्रह्म प्रावादिष्म तन्नो मा हासीत् ॥

ओं शान्तिः शान्तिः शान्तिः ॥

**===== शुभं =====**